* B B D - 0 0 1 - 0 1 4 4 1 2 *

**BBD-001-014412** Seat No. ________

# M. A. (Sem. IV) (CBCS) Examination

**June / July – 2021**

**Sanskrit : Paper - ECT-05**

***(Vedantshastra)***

***(Old Course)***

(१) श्रीभाष्यम् (सूत्राणि १–१–२ तः ४)

(२) अणुभाष्यम् (सूत्रम् १–१–४)

**Faculty Code : 001**
**Subject Code : 014412**

Time : $2\frac{1}{2}$ Hours] [Total Marks : **70**

૧. નીચેનામાંથી કોઈપણ બે પરિચ્છેદોનો અનુવાદ કરો : ૧૪
1. Translate any two of the following paragraphs : 14

(१) ब्रह्मशब्दैक्यादत्राप्यैक्यं प्रतीयत इति - चेन्न, अज्ञातगोव्यक्तेः जिज्ञासोः पुरुषस्य खण्डो मुण्डः पूर्णशृङ्गो गौरित्युक्ते गोपदैक्येऽपि खण्डत्वादिव्यावर्तकभेदेन गोव्यक्तिबहुत्वप्रतीतेः - ब्रह्मव्यक्तयोऽपि बह्व्यः स्युः । अत एव लिलक्षयिषिते वस्तुन्येषां विशेषणानां सम्भूयलक्षणत्वमनुपपन्नम् । नाप्युपलक्षणत्वेन लक्षयन्ति, आकारान्तराप्रतिपत्तेः । उपलक्षणानामेकेनाकारेण प्रतिपत्तिहेतुत्वं हि दृष्टं - 'यत्रायं सारसः देवदत्तस्यकेदार' इत्यादुषु । ननु च सत्यं ज्ञानमनन्तं ब्रह्म (तै.२.१.१) इति प्रतिपन्नाकारस्य जगज्जन्मादीन्युपलक्षणानि भवन्ति, न इतरेतरप्रतिपन्नाकारापेक्षत्वेन - उभयोर्लक्षणवाक्ययोरन्याश्रयणात्, अतो न लक्षणतो ब्रह्म प्रतिपत्तुं शक्यत इति ।

(२) उच्यते - किमिदमेकचेतनाधीनत्वं, न तावत्तदायत्तोत्पत्तिस्थितित्वं, दृष्टान्तो हि साध्यविकलः स्यात् । न ह्यारोगं स्वशरीरमेकचेतनायत्तोत्पत्तिस्थितिः तच्छरीरस्य भोक्तॄणां भार्यादिमर्वचेतनानामदृष्टजन्यत्वा-त्तदुत्पत्तिस्थित्योः । किञ्च - शरीरावयविनः स्वावयवसमवेततारूपास्थितिरवयवसंश्लेषविशेषव्यतिरेकेण न चेतनमपेक्षते । प्राणानलक्षणा तु स्थितिः पक्षत्वाभिमते स्थितिजलधिमहीधरादौ न सम्भवतीति पक्षसपक्षा-नुगतामेकरूपां स्थितिं नोपलभामहे ।

(३) अत्राह - न वेदान्तवाक्यानि ब्रह्म प्रतिपादयन्ति, प्रवृत्तिनि वृत्त्यन्वयविरहिणः शास्त्रस्यानर्थक्यात् । यद्यपि - प्रत्यक्षादीनि वस्तुयाथात्म्यबोधे पर्यवस्यन्ति, तथापि - शास्त्रं प्रयोजनपर्यवसाय्येव । न हि लोकवेदयोः प्रयोजनरहितस्य कस्यचिदपि वाक्यस्य प्रयोग उपलब्धचरः । न हि किञ्चित्प्रयोजनमनुद्दिश्य वाक्यप्रयोगः, श्रवणं वा सम्भवति, तच्च प्रयोजनं प्रवृत्तिनिवृत्तिसाध्येष्टानिष्टप्राप्तिपरिहारात्मकमुपलब्धम् - 'अर्थार्थी राजकुलं गच्छेत्, मन्दाग्निर्नाम्बु पिबेत्, स्वर्गकामो यजेत्, न कलञ्जं भक्षये'दित्येवमादिषु । यत्पुनः सिद्धवस्तुपरेष्वपि 'पुत्रस्ते जातः, नायं सर्पो रज्जुरेषे'त्यादिषु हर्षभयनिवृत्तिरूपपुरुषार्थान्वयो दृष्ट इत्युक्तं तत्र किं पुत्रजन्माद्यर्थात्पुरुषार्थावाप्तिः,उत तज्ज्ञानादिति विवेचनीयम् ।

(४) ननु सर्वप्रमामविषयत्वे दूषिते केवलवेदविषयत्वं कथं सिद्धान्तीक्रियते ? उच्यते । चक्षुरादीनां प्रामाण्यमन्यमुखनिरीक्षकत्वेन । न स्वतः, भ्रमानुत्पत्तिप्रसङ्गात् । सत्त्वसहितानामेव चक्षुरादीना प्रामाण्यात् । अतो निरपेक्षा एव भगवन्निःश्वासरूपवेदा एव प्रमाणम् । सङ्केतग्रहस्तु वैदिक एव वेदविद्भिः कृतः । आकृतिमात्रार्थ लोकापेक्षा । अनधिगतार्थगन्तृ च प्रमाणम् । लोकानधिगत इत्यर्थः । यज्ञब्रह्मणोरलौकिकत्वं सिद्धमेव । लौकिको व्यवहारः सन्निपातरूपत्वात् पुरुषार्थसाधक एव । तर्हि शब्दमात्रस्य किं ग्रहणम् ? वेदव्याख्यातृवाग्विषयत्वादिति ब्रूमः एतेन 'मनसैवानुद्रष्टव्य'मित्यपि समर्थिम् ।

૨. નીચેનામાંથી કોઈપણ બે સ્પષ્ટ રીતે સમજાવો : ૧૪
2. Explain clearly any two of the following : 14

(१) ब्रह्मलक्षणतः प्रतिप्रत्तिं शक्यत इति सिद्धम् ।
(२) नाप्युपमानं विशेषतो दृष्टं, सामान्यतो दृष्टं वा ।
(३) सावयवत्वादेव जगतः कार्यत्वं न प्रत्याख्यातुं शक्यते ।
(४) अभेदः परमार्थ इति निश्चीयते ।

૩. શ્રીસંપ્રદાયની પરંપરાનું સવિસ્તર વર્ણન કરો. ૧૪
3. Describe in detail the tradition of श्रीसम्प्रदाय. 14

અથવા / OR

૩. શ્રીભાષ્ય અનુસાર 'જન્માદ્યધિકરણ' સમજાવો. ૧૪
3. Explain the 'जन्माद्यधिकरण' according to श्रीभाष्य. 14

૪. વલ્લભાચાર્યનો સંક્ષિપ્ત પરિચય આપી તેમનું તત્ત્વજ્ઞાન સમજાવો. ૧૪
4. Give brief introduction of Vallabhacharya and explain his philosophy in detail. 14

અથવા / OR

૪. અણુભાષ્ય અનુસાર ''ईक्षतेर्नाशब्दम् ।।'' સૂત્ર સ્પષ્ટ રીતે સમજાવો. ૧૪
4. Explain clearly the sutra ''ईक्षतेर्नाशब्दम् ।।'' according to अणुभाष्य. 14

૫. નીચેનામાંથી કોઈ પણ બે પર ટૂંક નોંધ લખો : ૧૪
5. Write short notes on any two of the following : 14

(૧) શ્રીભાષ્યાનુસાર બ્રહ્મતત્ત્વ વિચારણા
(1) Thoughts of ब्रह्मतत्त्व according to श्रीभाष्य

(૨) રામાનુજાચાર્યાનુસાર પ્રમાણવિચાર
(2) प्रमाणविचारः according to Ramanujacharya

(३) 'अणुभाष्यम्' इति संज्ञा

(४) सूत्रम् - अधिकरणः - भाष्यम्